International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 207-211
© 2026 IJMH
www.themultijournal.com
Received: 07-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**मामिना साहुः**
विद्यावारिधिः शोधच्छात्री,
अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहार, पुरी, ओडिशा

**Correspondence:**
**मामिना साहुः**
विद्यावारिधिः शोधच्छात्री,
अद्वैतवेदान्तविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहार, पुरी, ओडिशा

# सांख्य-योगमते सृष्टितत्त्वम्

**मामिना साहुः**

भारतीयपरम्परायां दर्शनं जीवनस्य, जगतः, आत्मनः तथा परमसत्यस्य च तत्त्वज्ञानमिति परिगण्यते। भारतीयदर्शने दर्शनस्य लक्ष्यं केवलं बौद्धिकचिन्तनं न, अपि तु मोक्षप्राप्तिरस्ति। अतः अत्र दर्शनं व्यवहारिकजीवनस्य मार्गदर्शकम् अपि भवति। दुःखेऽस्मिन् संसारे सर्वे जीवाः दुःखं परिहर्तुमिच्छन्ति। केनापि दुःखं नैव इष्यते, अतः मानवः दुःखात् मोक्षं कथं मुच्यते, जीवस्य स्वरूपं किम्, जगतः कारणं किम्, ईश्वरः अस्ति वा न, इत्यादीनां प्रश्नानां समाधानं दर्शनशास्त्रे अन्विष्यते। अस्य नामरूपाख्यस्य विचित्रस्य जगतः कस्मादुत्पत्तिः। जीवः कः इति जिज्ञासा सर्वेषां वर्तते एव। उक्तं हि ऋग्वेदीयनासदीयसूक्ते-

**"को अद्धा वेद क इह प्रवोचत् कुत अजाता कुत इयं सृष्टिः।**
**अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आ बभूव"**।। इति।

सृष्टिविषये सर्वेषां दर्शनानां भिन्नं भिन्नं मतमस्ति। यथा पूर्वं दृष्टं न्यायवैशेषिकमते नित्यैः परमाणुभिः अदृष्टवशात् द्व्यणुकादिभिः जगत् सृज्यते। अद्वैतमते संसारसृष्टेः कारणमज्ञानमेव तद्वत् अस्य दर्शनस्यापि सृष्टिविषये स्वमतं वर्तते।

सांख्यदर्शनस्य प्रवक्ता भवति महर्षिः कपिलमुनिः। तैः एव सांख्यसूत्राणि लिखितानि। विद्वद्भिः उच्यते यत् यानि सांख्यसूत्राणि लभ्यन्ते तानि कपिलविरचितानि। सांख्यदर्शनस्य वक्तृरूपेण कपिलमहर्षेः नाम श्रुतौ, महाभारते, भागवते चपि लभ्यते। 'सांख्य' इति शब्दस्य अर्थः भवति सम्यक् विचारः। उक्तममरकोषे–

**"चित्ताभोगा मनस्कारश्चर्चा संख्या विचारणा"**[१] ।। इति।

सांख्यदर्शने पञ्चविंशतितत्त्वानि सन्ति। अतः पञ्चविंशतिसंख्यया सह अस्य सम्बद्धः अस्ति इति कृत्वा अस्य नाम सांख्यम् इति कैश्चित् मन्यते। महाभारते अपि उक्तम्-

**"संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।**
**तत्त्वानि च चतुर्विंशत् तेन सांख्यं प्रकीर्तितम्"**[२] ।।

सांख्यदर्शने सृष्टेः मूलकारणं द्वे तत्त्वे स्तः- प्रकृतिः तथा पुरुषः। एतयोः तत्त्वयोः स्वरूपं परस्परं अत्यन्तं भिन्नम् अस्ति। प्रकृतिः जडा, अचेतना, परिवर्तनशीलस्वभावा च अस्ति। सा सर्वस्य जगतः मूलकारणभूता। अपरं पुरुषः चेतनतत्त्वम् अस्ति। सः आत्मस्वरूपः, ज्ञानस्वरूपः, साक्षी च। सः कर्ता न भवति, केवलं द्रष्टा भवति। सः न कदापि परिवर्तते, न च तस्य कश्चन विकारः। पुरुषः नित्यशुद्धबुद्धमुक्तस्वभावः अस्ति। तथापि अज्ञानवशात् सः प्रकृतेः सह आत्मानं सम्बद्धं मन्यते, तेन सः बन्धनम् अनुभवति। अत्र प्रधानस्य अवस्थाद्वयं भवति साम्यावस्था वैशम्यावस्था। सृष्टेः आरम्भः कथं भवति इति प्रश्नः अत्र मुख्योऽस्ति। सांख्यदर्शने उक्तं यत् यदा एते त्रिगुणाः सम्यावस्थायां भवन्ति, तदा सृष्टिः न भवति। सा अवस्था प्रलयः इति कथ्यते। तस्मिन् काले प्रकृतिः निष्क्रियावस्थायां भवति। किन्तु यदा एतेषां गुणानां मध्ये असंतुलनं जायते, तदा प्रकृतिः सक्रियत्वं प्राप्नोति, सृष्टेः प्रक्रिया आरभ्यते। गुणेषु यत् वैशम्यं जायते तदेव सृष्टेः मूलम्। अतः सृष्टिसमये त्रयाणां गुणानां वैशम्यं जायते। यथा एकमेव मेघगतजलं नारिकेलाद्याधारकारणतः वैचित्र्यमधुररसादिकं भजते।

तद्वत् प्रकृरपि गुणवैषम्यकारणात् नानविधसृष्टिं कुरुते। उक्तञ्च-

**"कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदायाच्च।**

**परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्"**[३] ।।

अद्वैतवेदान्तिनां मते जगत् ईश्वरस्य लीला अस्ति, किन्तु सांख्यकारिकाकारः ईश्वरकृष्णः कथयति यत् प्रकृतेः पुरुषस्य च संयोगः विशिष्टोद्देश्येन भवति। किं तावदुद्देश्यमिति चेत् पुरुषस्य कैवल्यम्, प्रधानस्य दर्शनम् अर्थात् भोगार्थम्। तदुच्यते सांख्य-कारिकायाम्-

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः"**॥[४]

सृष्टिः प्रकृति-पुरुषयोः संयोगात् जायते। अस्य संयोगस्य द्वे मुख्ये प्रयोजने स्तः प्रधानस्य दर्शनार्थम् अर्थात् भोगाय प्रकृतिः प्रधानम् स्वस्य असीमशक्तिं वैभवं च प्रदर्शयितुम् इच्छति। यथा एका नर्तकी रङ्गमञ्चे स्वकलां प्रदर्शयति, तथैव प्रकृतिः पुरुषस्य पुरतः स्वं प्रकटीकरोति। पुरुषः द्रष्टाअस्ति, अतः सः प्रकृतेः विविधान् भोगान् द्रष्टुं शक्नोति। यदि पुरुषः न स्यात्, तर्हि प्रकृतेः सृजनशक्तिः व्यर्था अभविष्यत्। अतः प्रकृतेः आत्मप्रदर्शनाय पुरुषस्य आवश्यकता वर्तते। पुरुषस्य कैवल्यार्थम् अर्थात् मोक्षाय पुरुषः शुद्धः बुद्धः च अस्ति, किन्तु अज्ञानवशात् सः प्रकृतेः गुणैः सह आत्मानं संयोजयति। अतः सः दुःखमनुभवति। तस्मात् दुःखात् मुक्तिः कैवल्यम् एव तस्य परमं लक्ष्यम्। मोक्षः केवलं विवेकज्ञानेन सम्भवति, तच्च ज्ञानं प्रकृतेः साहाय्येन विना न लभ्यते। अतः पुरुषस्य मोक्षाय प्रकृतेः आवश्यकता वर्तते। अत्र दृष्टान्तः प्रदीयते पङ्ग्वन्धवदिति। कश्चित् सघनः अरण्यः अस्ति। तत्र अग्निलग्नः अस्ति। तस्मिन् अरण्ये द्वौ पुरुषौ भ्रमतः एकः अन्धः अन्यश्च पङ्गुः। अन्धः बलवान् अस्ति, चलितुं धावितुं च शक्नोति, किन्तु सः मार्गं द्रष्टुं न शक्नोति। अतः सः प्रकृतेः प्रतीकम् अस्ति - या क्रियाशीला अस्ति किन्तु अचेतना। पङ्गः सर्वं पश्यति, मार्गं जानाति, किन्तु सः चलितुं न शक्नोति। अतः सः पुरुषस्य प्रतीकम् अस्ति - यः चेतनः अस्ति किन्तु अक्रियः। यदा तौ द्वौ मिलित्वा सहकार्यं कुर्वाते, तदा तौ अरण्यात् बहिः गन्तुं शक्नुतः। अन्धः पङ्गुं स्वस्कन्धे आरोपयति। पङ्गुः मार्गं दर्शयति, अन्धश्च तदनुसारं पदक्षेपं करोति। एवं दृष्टिः च क्रिया च मिलित्वा लक्ष्यं प्राप्नुतः। एवमेव पुरुषः (पङ्गुः) दर्शनशक्तिं ददाति, प्रकृतिः (अन्धः) च सृष्टिक्रियाशक्तिं ददाति। अनयोः प्रकृतिपुरुषयोः संयोगादेव संसारस्य उत्पत्तिः सर्गः सृष्टिर्भवति। उच्यते च सृष्टिक्रमः–

**"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।**

**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि"**॥[५]

अर्थात् प्रकृतितः बुद्धेः सृष्टिः, बुद्धितत्त्वात् अहंकारः जायते, अहङ्कारात् षोडश तत्त्वानां समूहः उत्पद्यते। अयं समूहः द्वेधा विभक्तः अस्तिः। एकादश इन्द्रियाणि पञ्च तन्मात्राणि च। एकादश इन्द्रियाणि भवन्ति पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः। तस्मात् षोडशकात् पञ्चभ्यः तन्मात्रेभ्यः पञ्च स्थूलमहाभूतानि उत्पद्यन्ते इति श्लोकार्थः।

प्रकृतेः प्रथमः विकारः 'महत्' इति अस्ति। लोकव्यवहारे अस्य नाम 'बुद्धिः' इति। प्रकृतेः सात्त्विकांशात् अस्य उत्पत्तिः भवति, अतः महत्तत्त्वं प्रकाशकं लघ्वं च अस्ति। उक्तं हि-

**"अध्यावसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।**

**सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्"**।।[६]

एषा बुद्धिरेव निश्चयात्मिका क्रिया करोति। प्रकृतौ यदा गुणानां वैषम्यं भवति, तदा बुद्धेः उदयः भवति। इयं बुद्धिः सर्वेषां ज्ञानव्यापाराणां आधारभूता अस्ति। सांख्यसूत्रे उक्तम्- **"अध्यवसायो बुद्धिः"**।[७]

अध्यवसायः नाम कश्चन निश्चयः। यदा वयं किमपि वस्तु पश्यामः, तदा 'इदं मम कर्तव्यम्' इति यः दृढनिश्चयः अन्तःकरणे जायते, सः एव अध्यवसायः। इयमेव बुद्धेः मुख्या क्रिया अस्ति। सांख्यमते मनुष्यस्य अन्तःकरणे तिस्रः वृत्तयः क्रमेण कार्यं कुर्वन्ति। आलोचनम् इन्द्रियैः विषयस्य सामान्यज्ञानम्। अभिमानः "अहम् अत्र अधिकारी अस्मि" इति अहङ्कारस्य उदयः। अध्यवसायः "मया इदं कर्तव्यम्" इति बुद्धेः निश्चयात्मकं ज्ञानम्। एतासु तिसृषु वृत्तिषु बुद्धेः 'अध्यवसायः' श्रेष्ठा वृत्तिः अस्ति। बुद्धेः अष्टौ धर्माः। चत्वारः सात्त्विकाः धर्माः। चत्वारः तामसाः धर्माः। सात्त्विकाः धर्माः भवन्ति धर्मज्ञानविरागैश्वर्यम्। तामसाः धर्माः भवन्ति अधर्माज्ञाना-विरागानैश्वर्यम्।

अत्र एकः प्रश्नः उत्तिष्ठति यत्- बुद्धिः तु प्रकृतेः कार्यम् अस्ति, अतः सा जडा अस्ति। तर्हि सा निश्चयं कथं करोति? अस्य समाधानं 'चेतनपुरुषसान्निध्यात्' इति दीयते। यथा कोऽपि स्फटिकमणिः स्वयं रक्तवर्णः न भवति, किन्तु पार्श्वे स्थितस्य जपाकुसुमस्य प्रभावेण सः रक्तः दृश्यते, तथैव बुद्धिः जडा सत्यपि चेतनपुरुषस्य प्रतिबिम्बात् चेतनवत् भासते। पुरुषस्य चैतन्यशक्त्या एव बुद्धिः लोकवत् निश्चयं कर्तुं समर्था भवति। अस्यां सृष्टिक्रमप्रक्रियायां महत्तत्त्वात् 'अहङ्कारः' उत्पद्यते। एतस्य अहङ्कारस्य किं लक्षणम् सांख्यका-रिकायाम् उक्तम्-

**"अभिमानोऽहंकारः तस्मात् द्विविधः प्रवर्तते सर्गः।**

**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव"**।।[८]

अभिमानः नाम 'अहम्' इति प्रत्ययः। यदा बुद्धिः किमपि विषयं निश्चिनोति, तदा अहङ्कारः तं विषयं प्रति "अयं ममैव विषयः", "अहमेव अस्मिन् कार्ये समर्थः", "अहमेव अत्र स्वामी" इति भावं जनयति। अहङ्कारात् द्विविधः सर्गः अहङ्कारात् द्विविधः सर्गः प्रवर्तते।-

क. एकादशकानां समूहः एकादश इन्द्रियाणि।

ख. तन्मात्रपञ्चकम् पञ्च तन्मात्राणि। अहङ्कारे त्रयः गुणाः सत्त्व-रज-तमांसि भवन्ति। गुणानां प्राधान्येन अहङ्कारस्य त्रीणि रूपाणि सन्ति। उक्तञ्च–

**"सात्त्विकः एकादशकः प्रवर्तते वैकृतादहङ्कारात्।**
**भूतादेस्तन्मात्रः सः तामसः तैजसादुभयम्।।**[९]

वैकृतः अहङ्कारः सात्त्विकः। यदा अहङ्कारे सत्त्वगुणस्य अधिकता भवति, तदा सः 'वैकृतः' इति कथ्यते। अस्मात् सात्त्विकाहङ्कारात् एकादश इन्द्रियाणि उत्पद्यन्ते। सत्त्वगुणाः प्रकाशकाः भवन्ति, अतः इन्द्रियाणाम् अपि ज्ञानप्रकाशकत्वं सत्त्वादेव आगच्छति। पञ्च ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुरसनाघ्राणाख्यानि।

पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। मनः एकादशं इन्द्रियम्। भूतादिः अहङ्कारः। तामसः यदा अहङ्कारे तमोगुणस्य प्राधान्यं भवति, तदा सः 'भूतादिः' इति उच्यते। अस्मात् तामसाहङ्कारात् पञ्च तन्मात्राणि शब्द-स्पर्श-रूप-रस-गन्धाः जायन्ते। एतानि तन्मात्राणि एव स्थूलमहाभूतानां पृथिव्यादीनां कारणानि भवन्ति। तैजसः अहङ्कारः राजसः यदा अहङ्कारे रजोगुणः अधिकः भवति, तदा सः 'तैजसः' इति कथ्यते। रजोगुणः क्रियाशीलः भवति। सात्त्विक-तामस-अहङ्कारौ जडौ (Inert) इव भवतः, तौ स्वयमेव कार्यं कर्तुं न शक्नुतः। अतः राजसः अहङ्कारः तैजसः उभयोः साहाय्यं करोति। तैजसः शक्त्या एव सात्त्विकाहङ्कारात् इन्द्रियाणि तथा तामसाहङ्कारात् तन्मात्राणि उत्पद्यन्ते। अहङ्कारात् इन्द्रियाणां जन्म भवति। सांख्यमते इन्द्रियाणि केवलं शरीरस्य अङ्गाणि न सन्ति, अपितु तानि सूक्ष्माणि तत्त्वानि सन्ति यानि ज्ञानस्य कर्मणः च साधनं भवन्ति। इन्द्रियम् 'इन्द्र' (आत्मा) इत्यस्य लिङ्गं (चिह्नं) मन्यते। इन्द्रस्य आत्मा, स येन ईयते ज्ञायते तद् इन्द्रियम्। निरुक्तव्याख्यायाम् आचार्येण दुर्गाचार्येण लिखितम्– "इन्द्रः आत्मा, स येन ईयते लिङ्ग्यते अनुमीयते चास्त्यसावात्मा कर्ता यस्येदं करणम्, नाकर्तृकम् करणमस्तीति तद् इन्द्रियम् इति"। सांख्यकारिकायाः २६ तमे श्लोके इन्द्रियाणां मुख्यः विभागः कृतः अस्ति।

**"बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि।**
**वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः"॥**[१०]

अस्मिन् श्लोके इन्द्रियाणि द्विधाविभक्तानि - बुद्धीन्द्रियाणि वा ज्ञानेन्द्रियाणि तथा कर्मेन्द्रियाणि। मनः तु उभयात्मकं भवति, अतः आहत्य एकादश इन्द्रियाणि सन्ति। यानि इन्द्रियाणि बाह्यविषयाणां ज्ञानं प्रापयन्ति, तानि बुद्धीन्द्रियाणि उच्यन्ते। एतेषां कार्यं आलोचनम्। श्रोत्रम्, त्वक्, चक्षुः , रसना, घ्राणम्। तथा हि उक्तम्–

**"एवं श्रोत्रं त्वचो नेत्रं रसना नासिका तथा।**
**पञ्च बुद्धीन्द्रियाण्याहुः शास्त्रज्ञा इति विचक्षणाः"।।**

अक्षपादसूत्रमपि वर्तते– "गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः" इति। वात्स्यायनभाष्ये अपि लिखितमस्ति यत्– " पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रमम् अर्थाः विषयाः" इति। तथा हि उक्तम्–

**"शब्दः स्पर्शश्च रूपं रसो गन्धो ह्यनुक्रमात्।**
**बुद्धीन्द्रियाणां विषयाः समाख्याता महर्षिभिः"।।** इति।

यानि इन्द्रियाणि शरीरस्थक्रियाः सम्पादयन्ति, तानि कर्मेन्द्रियाणि। वाक् , पाणिः, पादः, पायुः, उपस्थः इति एतानि पञ्च। वाक् अस्य कार्यं वचनम् अस्ति। पाणिः अस्य कार्यं आदानमं वस्तूनां ग्रहणं त्यागः चास्ति। पादः अस्य कार्यं विहरणं गमनं/चलनम् अस्ति। पायुः अस्य कार्यं विसर्गः मलत्यागः अस्ति। उपस्थः अस्य कार्यं आनन्दः प्रजननं च अस्ति। तथा हि उक्तम्– **"वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्।"**[११]

मनः ज्ञानेन्द्रियं कर्मेन्द्रियं च इति उभयविधं कार्यं करोति। मनसा विना न किमपि इन्द्रियं स्वविषयं ज्ञातुं समर्थम्। मनः इन्द्रियैः प्राप्तानां संवेदनानां सङ्कल्पं विकल्पं च करोति। सात्त्विकाहङ्कारात् जायमानत्वात् एतत् इन्द्रियं भवति। मनः सर्वेषाम् इन्द्रियाणां प्रवर्त्तकं नियामकं च। उक्तञ्च–

**"उभयात्मकमत्र मनः सङ्कल्पकमरिन्द्रियं च साधर्म्यात्।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाच्च"॥**[१२]

सर्वेन्द्रियाणां प्रेरकत्वात् मनसः इति नाम। तथा हि उक्तम्–

**"मनो बुद्धीन्द्रियं विज्ञैः कर्मेन्द्रियमपि स्मृतम्।**
**मनोऽधिष्ठितमेवेदमिन्द्रियं यत्प्रवर्तते"।।** इति।

न्याय-वैशेषिकदर्शने इन्द्रियाणि भौतिकानि महाभूतैः निर्मितानि मन्यन्ते। किन्तु सांख्यदर्शने इन्द्रियाणि आङ्कारिकाणि अर्थात् अहङ्कारात् उत्पन्नानि सन्ति। यदि इन्द्रियाणि भौतिकानि भवेयुः, तर्हि तानि केवलं स्वसमानगुणयुक्तान् विषयान् एव जानीयुः। परन्तु इन्द्रियाणि सूक्ष्मास्तु सूक्ष्मशक्तिसम्पन्नानि सन्ति, अतः सात्त्विकाहङ्कारात् एतेषाम् उत्पत्तिः युक्ता। ज्ञानेन्द्रियाणां वृत्तिः केवलं आलोचनमात्रम् । अर्थात् निर्विकल्पकं ज्ञानम्। यथा - किमपि अस्ति इति ज्ञानम्। तस्य विशेषनिश्चयः तु बुद्ध्या भवति। क्रियाः कर्मेन्द्रियाणां वृत्तिः शरीरेण सह सम्बद्धा भवति।

अहङ्कारात् यः षोडशसंख्यकानां तत्त्वानां समूहः षोडशको गणः उत्पद्यते, तस्मिन् पञ्च तन्मात्राणि प्रमुखाणि सन्ति। एतानि सन्ति- शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रम् च। 'तन्मात्र' इति शब्देन पञ्चमहाभूतानां 'सूक्ष्मावस्था' उच्यते। सांख्यमते एतानि तन्मात्राणि एव पञ्चमहाभूतानां मूलकारणानि सन्ति। एतेषां तन्मात्राणां महाभूतैः सह सम्बन्धः एवं वर्तते। शब्दतन्मात्रात् आकाशस्य उत्पत्तिः। स्पर्शतन्मात्रात् वायोः उत्पत्तिः। रूपतन्मात्रात् तेजसः अग्नेः उत्पत्तिः। रसतन्मात्रात् अपां जलस्य उत्पत्तिः। गन्धतन्मात्रात् पृथिव्याः उत्पत्तिः। एतानि पञ्चमहाभूतानि यदा परस्परं मिलन्ति, तदा अस्माकं दृश्यमानं व्यवहारात्मकं स्थूलं जगत् सृज्यते। तन्मात्राणि अतीन्द्रियाणि सूक्ष्माणि भवन्ति, किन्तु महाभूतानि अस्माकं ज्ञानेन्द्रियैः ग्राह्याणि सन्ति। एव प्रकारेण सांख्यदर्शने सूक्ष्मात् स्थूलं प्रति सृष्टेः विकासः कल्पितः अस्ति।

**योगमते सृष्टिः -**

भारतीयदर्शनपरम्परायां षड्दर्शनानि विशेषमहत्त्वानि वहन्ति। तेषु योगदर्शनमेकं प्रमुखं दर्शनम्। अस्य प्रवर्तकः पतञ्जलिमहर्षिः इति प्रसिद्धः। योगदर्शनं न केवलं दार्शनिकचिन्तनस्य विषयः, अपितु व्यवहारिकजीवनस्य अपि मार्गदर्शकः अस्ति। अत्र मानवजीवनस्य दुःखनिवारणं, चित्तशुद्धिः, आत्मसाक्षात्कारः च मुख्यलक्ष्यरूपेण इत्येते विषयाः निरूपिताः। योगदर्शनस्य मूलग्रन्थः "योगसूत्रम्" इति। अस्मिन् ग्रन्थे चत्वारः पादाः सन्ति- समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादः च। एतेषु चतुर्षु भागेषु योगस्य सिद्धान्ताः, साधनानि, अनुभवानि, मोक्षमार्गः च क्रमशः विवेचिताः।

योगदर्शनस्य परिभाषा द्वितीयसूत्रे एव निर्दिष्टा अस्ति- "योगश्चित्तवृत्तिनिरोधः"।[१३] अत्र योगस्य स्वरूपं स्पष्टं भवति यत् चित्तस्य वृत्तीनां निरोधः एव योगः। चित्तं नाम अन्तःकरणस्य एकः भागः अस्ति, यत्र विचाराः, भावनाः, स्मृतयः च प्रवहन्ति। एतासां वृत्तीनां नियन्त्रणेन मनः स्थिरं भवति, तदा आत्मस्वरूपस्य अनुभवः जायते।

योगदर्शनं सांख्यदर्शनस्य तत्त्वमीमांसां स्वीकृत्य तस्य व्यवहारिकमार्गं प्रदर्शयति। सांख्ये यः पुरुष– प्रकृतिवादः अस्ति, सः योगे अपि स्वीकृतः। पुरुषः चेतनः, नित्यः, साक्षी च अस्ति; प्रकृतिः जडा, त्रिगुणात्मिका च । एतयोः संयोगेन संसारः, अनुभवः, सृष्टिः च भवति। किन्तु योगदर्शने एकः विशेषः अस्ति- अत्र ईश्वरस्य अपि स्वीकृतिः दृश्यते। योगसूत्रे "ईश्वरः" इति विशेषपुरुषः कथितः, यः क्लेशकर्मादिभिः रहितः। उक्तञ्च योगसूत्रे– "क्लेशकर्मविपाकाशयैरपरामृष्टः परुषविशेषः ईश्वरः"[१४]।

योगदर्शनस्य प्रमुखलक्ष्यं मोक्षप्राप्तिः अथवा कैवल्यम् अस्ति। कैवल्यं नाम पुरुषस्य स्वस्वरूपे स्थितिः, यत्र सः प्रकृतेः सर्वेभ्यः विकारेभ्यः मुक्तः भवति। अयं मोक्षः ज्ञानमात्रेण न, अपितु साधनद्वारा प्राप्तव्यः इति योगदर्शनस्य मतम्। तथा हि– **योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः"**।[१५] अतः अत्र अष्टाङ्गयोगस्य विधानं कृतम्।

अष्टाङ्गयोगः योगदर्शनस्य अत्यन्तमहत्वपूर्णः अंशः अस्ति। एते अष्ट अङ्गानि सन्ति- यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः। उक्तञ्च– **"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"**[१६] ।

यम-नियमौ नैतिकशिक्षां दत्तः, आसन-प्राणायामौ शारीरिकसामर्थ्यं वर्धयतः, प्रत्याहारः इन्द्रियनिग्रहं करुते, धारणा-ध्यान-समाधयः मानसिकएकाग्रतां च परमशान्तिं च प्रददति। एतेषां क्रमिकाभ्यासेन साधकः चित्तवृत्तीनां निरोधं कर्तुं समर्थः भवति।

योगदर्शने चित्तस्य अवस्थाः अपि वर्णिताः - क्षिप्तं, मूढः, विक्षिप्तं, एकाग्रं, निरुद्धः च । सामान्यतः मनः चञ्चलं भवति (क्षिप्तावस्था), कदाचित् जडतां गच्छति (मूढावस्था), कदाचित् एकाग्रतां लभते। किन्तु योगाभ्यासेन चित्तं "निरुद्धः" इत्यवस्थां प्राप्नोति, यत्र सर्वे वृत्तयः निवर्तन्ते। योगदर्शनस्य अन्यत् महत्वपूर्णं तत्त्वं क्लेशसिद्धान्तः अस्ति। पञ्च क्लेशाः - अविद्या, अस्मिता, राग, द्वेष, अभिनिवेशः - मानवजीवनस्य दुःखस्य मूलकारणानि भवन्ति। योगाभ्यासेन एते क्लेशाः क्रमशः नश्यन्ति, तदा मनः शुद्धं भवति। पतञ्जलिमहर्षिणा प्रणीतं योगदर्शनं केवलं योगाभ्यासस्य ग्रन्थः न, अपितु सृष्टेः, जीवस्य, चित्तस्य, तथा परमपुरुषस्य सम्बन्धं सम्यक् प्रकारेण निरूपयति। अत्र सृष्टिः न केवलं बाह्यजगतः उत्पत्तिः इति दृष्ट्या व्याख्यायते, किन्तु जीवस्य अनुभवरूपेण, चित्तवृत्तीनां प्रवाहेन, तथा पुरुषस्य साक्षित्वेन सह सम्बद्धा अस्ति। अस्मिन् योगदर्शने सृष्टिविचारः विस्तारपूर्वकं निरूप्यते, प्रथमं योगदर्शनस्य स्वरूपं ज्ञातव्यं यतः सृष्टिविचारः तस्य अन्तर्भूतः विषयः अस्ति। योगदर्शनस्य मूलग्रन्थः "योगसूत्रम्" इति, यः पतञ्जलिना रचितः। योगदर्शनस्य तत्त्वमीमांसा सांख्यदर्शनस्य आधारं स्वीकृत्य निर्मिता अस्ति। अतः सृष्टिविचारः अपि सांख्यदृष्ट्या एव स्वीक्रियते। सांख्यकारिकायां ईश्वरकृष्णेन उक्तं यत् प्रकृतिः एव जगतः मूलकारणम्। योगदर्शनं तदेव स्वीकरोति, किन्तु तत्र ईश्वरस्य विशेषस्वीकृतिः अस्ति। अतः योगदर्शने सृष्टिः द्वाभ्यां तत्त्वाभ्यां सम्बद्धा- पुरुषः तथा प्रकृतिः। पुरुषः चेतनस्वरूपः, नित्यः, सर्वव्यापी, अविकारः, केवलं द्रष्टा इति निर्दिष्टः। योगसूत्रे पुरुषस्य साक्षित्वं प्रतिपादितम्। उक्तं हि-

**"द्रष्टृदृश्ययोः संयोगो हेयहेतुः"**[१७]

अस्य सूत्रस्य गूढः दार्शनिकार्थः अत्र दृश्यते। अत्र "द्रष्टा" इति शब्देन पुरुषः अभिधीयते, यः शुद्धचैतन्यस्वरूपः, साक्षी, अविकारः च अस्ति। "दृश्य" इति शब्देन प्रकृतिः तथा तस्याः सर्वे विकाराः, यथा बुद्धिः, अहंकारः, मनः, इन्द्रियाणि, पञ्चमहाभूतानि च अभिधीयन्ते। "संयोगः" इति न केवलं भौतिकसंयोगः, अपितु तादात्म्यभावः - यत्र पुरुषः चित्तवृत्तिषु आत्मभावं करोति। वस्तुतः पुरुषः न कदापि प्रकृत्या सह वास्तविकतया संयुक्तः भवति, किन्तु अविद्यया तस्य मिथ्यासंयोगः अनुभूयते। अत्र "हेयहेतुः" इति शब्दः विशेषमहत्त्व-पूर्णः। "हेयम्" नाम दुःखम्, संसारः, जन्ममरणचक्रं च। तस्य "हेतुः" कारणम् एषः द्रष्टृ-दृश्य-संयोगः इति उक्तम्। अतः सृष्टिः (जगत्) स्वयमेव दुःखरूपा न, किन्तु तस्य पुरुषेण सह मिथ्यासंयोगः दुःखस्य कारणम्। व्यासभाष्ये स्पष्टतया उक्तम्- "संयोगो नाम तादात्म्यम्"। पुरुषः चित्तवृत्तीनां धर्मान् स्वधर्मत्वेन गृह्णाति, एषः एव बन्धनस्य मूलम्। यदा पुरुषः "अहं सुखी", "अहं दुःखी" इति मन्यते, तदा सः वास्तवतः चित्तस्य अवस्थां स्वात्मनि आरोपयति।

एषः संयोगः एव सृष्टेः अनुभवात्मकाधारः। यदि संयोगः न स्यात्, तर्हि न कश्चित् जगतः अनुभवः स्यात्। अतः योगदर्शने सृष्टिः न केवलं बाह्यवस्तुनिर्माणम्, अपितु अनुभवजन्यसंयोगः इति दृष्ट्या बोध्या।

पूर्वेऽस्मिन् सूत्रे यः "द्रष्टृदृश्यसंयोगः" संसारस्य कारणं इति उक्तः, तस्य कारणं किम्? इति प्रश्नस्य उत्तरम् अत्र दत्तम्- **"अविद्या"**। **उक्तञ्च सूत्रम्– "तस्य हेतुरविद्या"**[१८] ।

अविद्या योगदर्शने न केवलं अज्ञानम्, अपितु विपरीतज्ञानम्। यथा- अनित्ये नित्यबुद्धिः, अशुचौ शुचिबुद्धिः, दुःखे सुखबुद्धिः, अनात्मनि आत्मबुद्धिः- एषा अविद्या। अत्र विशेषतः "अनात्मनि आत्मबुद्धिः" सृष्टिबन्धनस्य मूलम्। पुरुषः चित्तस्य गुणान् आत्मत्वेन गृह्णाति, एषः एव संयोगस्य कारणम्। व्यासभाष्ये उक्तम्- "अविद्या नाम विपर्ययज्ञानम्"। तया प्रेरितः पुरुषः स्वस्वरूपं विस्मृत्य प्रकृतौ आसक्तः भवति। एवमविद्यया- पुरुषः भोक्ता इति मन्यते। प्रकृतिः आत्मा इति मनुते। जगत् सत्यं सुखरूपम् इति मन्यते। एताः सर्वाः भ्रान्तयः सृष्टेः बन्धनात्मकस्वरूपं जनयन्ति।

सृष्टिप्रक्रियायाम् अपि अविद्याया भूमिका अस्ति। यतः अविद्यया एव पुरुषः प्रकृत्या सह संलग्नः इव अनुभवति। अन्यथा तयोः कश्चित् सम्बन्धः न स्यात्। व्यासभाष्ये उक्तं यत् पुरुषः न कर्ता, न भोक्ता, किन्तु चित्तवृत्तीनां साक्षी। तस्य न किञ्चित् परिवर्तनं भवति, न सृष्टेः कर्तृत्वं तस्यास्ति। प्रकृतिः तु जडा अस्ति, सा त्रिगुणात्मिका-सत्त्वरजस्तमगुणयुक्ता। एते गुणाः यदा साम्यावस्थायां सन्ति तदा प्रकृतिः अव्यक्ता भवति। सांख्यकारिकायां प्रकृतेः महदादयः इति उक्तं यत् महदादि तत्त्वानि प्रकृतेः उत्पन्नानि भवन्ति। योगदर्शनम् अपि एतदेव स्वीकरोति।

यदा पुरुषस्य सन्निधौ प्रकृतिः भवति, तदा गुणानां साम्यभङ्गः जायते। एषः संयोगः द्रष्टृदृश्यसंयोगः। अस्य संयोगस्य कारणं अविद्या इति उक्तम्। अत्रैव सृष्टेः आरम्भः दृश्यते, यतः अविद्यया प्रेरिता प्रकृतिः स्वस्वरूपं परिवर्तयति। सृष्टिप्रक्रिया क्रमशः विकासरूपेण प्रवर्तते। प्रथमं प्रकृतेः महत्तत्त्वम् उत्पद्यते। महत्तत्त्वं बुद्धिरूपेण व्यवह्रियते। अस्य कार्यं निर्णयः, विचारः, विवेकः च। व्यासभाष्ये बुद्धेः प्रधानत्वं प्रतिपादितम्- "अध्यवसायात्मिका बुद्धिः" इति। ततः महतः अहंकारः उत्पद्यते। अहंकारः 'अहं कर्ता' इति भावस्य मूलम्। अहंकारः त्रिविधः - सत्त्विकः, राजसः, तामसः। सत्त्विकाहंकारात् ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, मनः च उत्पद्यन्ते। तामसाहंकारात् तन्मात्राणि उत्पद्यन्ते- शब्दः, स्पर्शः, रूपं, रसः, गन्धः च। एते सूक्ष्मतत्त्वानि सन्ति। ततः एभ्यः पञ्चमहाभूतानि- आकाशः, वायुः, अग्निः, आपः, पृथिवी च उत्पद्यन्ते। एषः समग्रः विकासक्रमः सांख्यकारिकायां विस्तरेण वर्णितः, योगदर्शनं तस्य अनुमोदनं करोति।

अत्र सृष्टिः "परिणामवाद" इति सिद्धान्तेन व्याख्यायते। कार्यं कारणस्य एव परिवर्तितरूपम् अस्ति। **"जात्यन्तरपरिणामः प्रकृत्यापूरात्"**[१९] इति उक्तं, यत् प्रकृतिः स्वयमेव विविधरूपेण परिणमति।

चित्तस्य भूमिका अत्र अत्यन्तमहत्वपूर्णा। चित्तं बुद्धिः, अहंकारः, मनः इत्येतैः मिलित्वा निर्मीयते। योगसूत्रे चित्तस्य स्वरूपं तथा तस्य वृत्तयः निरूपिताः- **"वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः"**[२०] । चित्तवृत्तीनां माध्यमेन एव पुरुषः सृष्टिमनुभवति। यदि चित्तं विक्षिप्तं भवति तर्हि संसारानुभवः भवति, यदि चित्तं निरुद्धं भवति तर्हि मोक्षः प्राप्तः भवति।

योगदर्शने ईश्वरस्य अपि विशेषस्थानं वर्तते। क्लेशादिरहितः ईश्वरः सृष्टेः निमित्तकारणं भवति, किन्तु उपादानकारणं न। सृष्टिः प्रकृतेः एव विकासः, किन्तु ईश्वरः तस्य नियामकः इति स्वीक्रियते। व्यासभाष्ये ईश्वरस्य सर्वज्ञत्वं, सर्वशक्तिमत्त्वं च प्रतिपादितम्। सृष्टेः प्रयोजनं योगदर्शने अत्यन्तं दार्शनिकरूपेण निरूपितम्। **"भोगापवर्गार्थं दृश्यं"**[२१] इति स्पष्टं उक्तम्- सृष्टिः भोगाय अपि, अपवर्गाय मोक्षाय अपि। पुरुषः प्रकृतिमाध्यमेन अनुभवं प्राप्नोति, ततः विवेकज्ञानं प्राप्य मोक्षं लभते। बन्धनस्य कारणं पञ्च क्लेशाः- **अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशः**[२२]। एते क्लेशाः निर्दिष्टाः। अविद्यया पुरुषः चित्तवृत्तिषु आत्मभावं करुते, तदा सृष्टिः तस्य बन्धनरूपेण अनुभवति। यदा योगाभ्यासेन अविद्या नश्यति, तदा सृष्टेः प्रभावः अपि नश्यति।

मोक्षः अथवा कैवल्यं योगदर्शने अन्तिमलक्ष्यम्। उक्तं हि योगसूत्रे- **"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यम्"**[२३] इति उक्तम्। यदा प्रकृतिः पुरुषस्य कृते कार्यं समाप्तं करोति, तदा सा पुनः स्वस्वरूपे प्रतिपद्यते, पुरुषः तु स्वतन्त्रः भवति। अत्र सृष्टेः अनुभवः समाप्तः भवति। अतः योगदर्शने सृष्टिः न केवलं भौतिकजगतः उत्पत्तिः, किन्तु जीवस्य आध्यात्मिकयात्रायाः एकः अङ्गः अस्ति। चित्तवृत्तीनां निरोधेन साधकः सृष्टेः बन्धनात् मुक्तिं प्राप्नोति।

**पादटिप्पणी**

१.अमरकोष– 1/5/3
२.महाभारतम्-12/31/42
३.सांख्यकारिका– 16
४.सांख्यकारिका– 21
५.सांख्यकारिका– 22
६.सांख्यकारिका– 23
७.सां.का.-2.13
८.सांख्यकारिका– 24
९.सांख्यकारिका– २५
१०.सांख्यकारिका– २६
११.सांख्यकारिका– २५
१२.सांख्यकारिका– २७
१३.योगसूत्रम्– 1.2
१४.योगसूत्रम्– 1.24
१५.योगसूत्रम्– 2.28
१६.योगसूत्रम्– 2.29
१७.योगसूत्रम्– २.१७
१८.योगसूत्रम्– २.२४
१९.योगसूत्रे-४.२
२०.योगसूत्रम्-१.५
२१.योगसूत्रे-२.१८
२२.योगसूत्रे-२.३
२३.योगसूत्रम्– ४.३४